collegebatch.com

Series ΣHEFG

SET ~ 4

प्रश्न-पत्र कोड
Q.P. Code 49

रोल नं.
Roll No.

परीक्षार्थी प्रश्न-पत्र कोड को उत्तर-पुस्तिका के मुख-पृष्ठ पर अवश्य लिखें ।
Candidates must write the Q.P. Code on the title page of the answer-book.

- कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे **15** पृष्ठानि मुद्रितानि सन्ति ।
- छात्राः प्रश्नपत्रे दक्षिण हस्तं प्रति प्रदत्तं प्रश्नपत्र-कोडम् उत्तर-पुस्तिकायाः मुखपृष्ठे लिखेयुः ।
- कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे **19** प्रमुखाः प्रश्नाः सन्ति ।
- **उत्तर लेखनात् पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः ।**
- अस्य प्रश्नपत्रस्य पठनाय 15 निमेषाः निर्धारिताः सन्ति । अस्मिन् अवधौ केवलं प्रश्नपत्रं पठनीयम्, उत्तरपुस्तिकायां च किमपि न लेखनीयम् ।
- Please check that this question paper contains **15** printed pages.
- Q.P. Code given on the right hand side of the question paper should be written on the title page of the answer-book by the candidate.
- Please check that this question paper contains **19** questions.
- **Please write down the serial number of the question in the answer-book before attempting it.**
- 15 minute time has been allotted to read this question paper. The question paper will be distributed at 10.15 a.m. From 10.15 a.m. to 10.30 a.m., the candidates will read the question paper only and will not write any answer on the answer-book during this period.

# संस्कृतम् (ऐच्छिकम्)

# SANSKRIT (Elective)

समयः : होरात्रयम्
निर्धारित समय : **3** घण्टे
Time allowed : **3** hour

पूर्णाङ्काः : **80**
अधिकतम अंक : **80**
Maximum Marks : **80**

collegebatch.com

**निर्देशाः :-**

(i) अस्मिन् प्रश्नपत्रे **पञ्च** खण्डाः सन्ति ।

(ii) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि ।

(iii) प्रश्नसङ्ख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया ।

(iv) सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि ।

(v) प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः ।

**प्रश्नपत्रस्वरुपम् –**

| | | | |
|---|---|---|---|
| खण्डः क | : | अपठित – अवबोधनम् | **10 अङ्काः** |
| खण्डः ख | : | रचनात्मक – कार्यम् | **10 अङ्काः** |
| खण्डः ग | : | अनुप्रयुक्त – व्याकरणम् | **15 अङ्काः** |
| खण्डः घ | : | (i) पठित – अवबोधनम् | **25 अङ्काः** |
| | | (ii) संस्कृतसाहित्येतिहासपरिचयः | **10 अङ्काः** |
| खण्डः ङ | : | छन्दोऽलङ्कारपरिचयः | **10 अङ्काः** |

collegebatch.com

## खण्डः 'क' 10 अङ्काः

### अपठित – अवबोधनम्

1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तान् प्रश्नान् संस्कृतेन उत्तरत ।

अद्यत्वे भारतीयजनानां पाश्चात्त्यशिक्षां प्रति महती रुचिः दृश्यते । सत्यमेव एतद् यत् शिक्षाप्राप्तिः एव मानवजीवनस्य लक्ष्यं वर्तते । पुरा भारतीयशिक्षाव्यवस्था तु सदैव अन्यदेशेभ्योऽपि उच्चतमा आसीत् । तक्षशिला–नालन्दा आदयः प्रसिद्धाः विश्वविद्यालयाः भारतदेशे एव स्थिताः आसन् । तेषु विश्वविद्यालयेषु शिक्षाप्रणाली प्रशंसनीया शिक्षकाः च सुप्रतिष्ठिताः च आसन् । परम् अद्यत्वे जनाः स्वदेशं त्यक्त्वा विदेशं गन्तुम् उत्सुकाः दृश्यन्ते । यद्यपि पाश्चात्त्यविद्यालय–विश्वविद्यालयेषु प्रवेशः न सुगमः तथापि प्रतिवर्षम् अनेके छात्राः विदेशगमनाय तत्पराः एव । अत्रापि काचित् हानिः नास्ति । इदं तु सत्यमेव यत् – "जननी जन्मभूमिश्च स्वर्गादपि गरीयसी ।" अतः ते जनाः शिक्षां प्राप्य चिकित्सकाः वैज्ञानिकाः अभियन्तारः वा भूत्वा स्वदेशहिताय संलग्नाः भवेयुः । देशस्य प्रतिष्ठा एव अस्माकं प्रतिष्ठा देशस्य उन्नतिः एव च अस्माकम् उन्नतिः । धन्याः ते जनाः ये शिक्षां प्राप्य स्वराष्ट्रहिताय तत्पराः प्रयत्नशीलाः च । वयं मिलित्वा पुनः भारतदेशस्य स्थानं विश्वस्य सर्वेषु देशेषु उच्चतमं विशिष्टतमं च कर्तुं शक्नुमः । स्वार्थबुद्धिं परित्यज्य अधुना देशहितम् एव करणीयम् ।

(अ) एकपदेन उत्तरत । (केवलं प्रश्न**द्वयम्**) $2 \times 1 = 2$

(क) स्वार्थबुद्धिं परित्यज्य किं करणीयम् ?

(ख) शिक्षाप्राप्तिः कस्य लक्ष्यं वर्तते ?

(ग) जनाः स्वदेशं त्यक्त्वा कुत्र गन्तुम् उत्सुकाः ?

(आ) पूर्णवाक्येन उत्तरत । (केवलं प्रश्न**द्वयम्**) $2 \times 2 = 4$

(क) वयं मिलित्वा किं कर्त्तुम् शक्नुमः ?

(ख) अद्यत्वे भारतीयजनानां महती रुचिः कुत्र दृश्यते ?

(ग) जनाः किं कृत्वा स्वदेशहिताय संलग्नाः भवेयुः ?

(इ) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत । 1

collegebatch.com

(ई) निर्देशानुसारम् उचितम् उत्तरं चित्वा लिखत – (केवलं प्रश्नत्रयम्) **3 × 1 = 3**

(क) 'अतः ते जनाः ________ संलग्नाः भवेयुः ।' अत्र 'जनाः' इति कर्तृपदस्य क्रियापदं किम् ?

(i) प्राप्य (ii) संलग्नाः

(iii) भवेयुः (iv) भूत्वा

(ख) 'जननी जन्मभूमिश्च स्वर्गादपि गरीयसी' अत्र 'माता' इति पदस्य पर्यायपदं किम् ?

(i) जन्मभूमिः (ii) जननी

(iii) स्वर्गात् (iv) भूमिः

(ग) 'अद्यत्वे भारतीयजनानां पाश्चात्त्यशिक्षां प्रति महती रुचिः दृश्यते ।' अत्र किं विशेषणपदम् ?

(i) महती (ii) अद्यत्वे

(iii) प्रति (iv) दृश्यते

(घ) 'धन्याः ते जनाः ये स्वराष्ट्रहिताय तत्पराः प्रयत्नशीलाः च ।' अत्र 'ये' इति सर्वनामपदं केभ्यः प्रयुक्तम् ?

(i) स्वराष्ट्रहिताय (ii) धन्येभ्यः

(iii) तत्पराः (iv) जनेभ्यः

**खण्डः 'ख'** **10 अङ्काः**

**रचनात्मक – कार्यम्**

2. (a) भवान् भवती वा 'बेंगलूरु' नगरे वसति । भवता/भवत्या गतमासे अजमेरनगरं दृष्टम् । अस्य नगरस्य ऐतिहासिकं शैक्षिकं वैशिष्ट्यं वर्णयन् / वर्णयन्ती प्रयागवासिनं स्वमित्रं प्रति मञ्जूषायां प्रदत्तसङ्केतानां सहायतया पत्रमेकं लिखत । **1 × 5 = 5**

**मञ्जूषा**

| |
|---|
| नमोनमः, राजस्थानप्रदेशे, गतमासे, शिक्षणसंस्थाः, शिक्षाबोर्डकार्यालयः, अनेकधर्माणाम् आस्थाकेन्द्रम्, अरावलीपर्वतश्रेणी, पर्यटकाः, परस्परम्, सौहार्दम्, दुर्गम्, द्रष्टुम्, मनोहरम्, निवेदनीयाः, प्रणमाञ्जलयः बेंगलूरुतः, अजमेरशरीफम्, पुष्करम् |

**अथवा**

collegebatch.com

(b) स्वविद्यालयस्य छात्राणां कृते सार्वजनिकवाहनस्य व्यवस्थां कारयितुं स्वविद्यालयस्य प्रधानाचार्यं प्रति एक पत्रं लिखत ।

**मञ्जूषा**

| |
|---|
| सेवायाम्, श्रीमन्तः प्रधानाचार्याः, वर्धमानं, छात्राः प्रदूषणस्तरम्, उपायान्, जीवनरक्षणार्थम्, श्वासम्, अभवत्, निजवाहनानां प्रयोगम्, अस्माकं कर्त्तव्यम्, सार्वजनिकवाहनेन आवागमनम्, अनुभवामि, भवताम्, धन्यवादाः, सविनयम् निवेदनम्, आज्ञाकारी, विलम्बः, उपकृताः भविष्यन्ति । |

3. (a) प्रदत्ततथ्यानां सहायतया अधोलिखितं विषयम् अधिकृत्य संस्कृतेन अनुच्छेदं लिखत – **5**

**विषयः – मम प्रियक्रीडा ।**

क्रीडायाः अनिवार्यता, क्रीडायाः वैशिष्ट्यम्, मानसिकं शारीरिकं सामाजिकं च विकासम्, भाविजीवनस्य निर्माणं, स्वास्थ्यस्य च महत्त्वप्रतिपादनम्, खेलभावना, अन्यलाभाः उपसंहारः च ।

**अथवा**

(b) हिन्दीभाषया आङ्ग्लभाषया वा लिखितवाक्येषु केषाञ्चन पञ्चवाक्यानां संस्कृतेन अनुवादं कुरुत ।

(1) हम मिलकर राष्ट्रगीत गाते हैं ।

We sing National Anthem together.

(2) सैनिक देश की रक्षा करते हैं ।

Soldiers defend the country.

(3) बच्चे हँसते हुए जा रहे थे ।

Childrens were laughing while going.

(4) कल हमारा स्वाधीनता दिवस होगा ।

Tomorrow will be our Independence Day.

(5) तुम्हें शाम को पढ़ना चाहिए ।

You should study in the evening.

(6) वे सब कार्यालय जा रही हैं ।

They all are going to the office.

(7) मेरी माँ मेरी प्रेरणा है ।

My mother is my inspiration.

collegebatch.com

## खण्डः 'ग' 15 अङ्काः

### अनुप्रयुक्त – व्याकरणम्

4. अधोलिखितवाक्येषु रेखाङ्कितपदानां सन्धिं सन्धिच्छेदं वा कृत्वा लिखत। (केवलं प्रश्न**त्रयम्**) 3 × 1 = 3

(क) कोऽपि तस्य प्रत्युत्तरं न ददौ।

(ख) कृतप्रतिज्ञोऽसौ शिववीरचरः।

(ग) भगवान् त्वाम् + दीर्घजीवनं कारयतु।

(घ) योग + अङ्गानाम् फलमपि ज्ञातुम् उत्कण्ठा वर्तते।

5. रेखाङ्कितपदानां प्रकृतिप्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं चित्वा लिखत। (केवलं प्रश्न**त्रयम्**) 3 × 1 = 3

(क) कुर्वन् एव इह कर्माणि जिजीविषेच्छतं समाः।

(i) कृ + शानच्  (ii) कृ + यत्

(iii) कृ + शतृ  (iv) कृ + क्तिन्

(ख) नूनम् अश्वमेध + ठक् अयम् अश्वः।

(i) अश्वमेधी  (ii) आश्वमेधिकः

(iii) अश्वमेधिकः  (iv) आश्वमेधिकम्

(ग) पठितम् एव हि युष्माभिरपि तत्काण्डम्।

(i) पठ् + क्त  (ii) पठ् + तव्यत्

(iii) पठ् + क्तिन्  (iv) पठ् + क्तवतु

(घ) अप्रबोधा घोर + टाप् च राज्यसुखसन्निपातनिद्रा।

(i) घोरः  (ii) घोरम्

(iii) घोरता  (iv) घोरा

collegebatch.com

6. मञ्जूषायां प्रदत्तैः समुचितैः अव्ययपदैः रिक्तस्थानानि पूरयित्वा वाक्यानि लिखत । (केवलं प्रश्न**त्रयम्**) **3 × 1 = 3**

(क) कर्मण्येवाधिकारस्ते ______ फलेषु कदाचन ।

(ख) धनान्धकारे पन्थाः ______ च नावलोक्यते ।

(ग) अरे मित्र ! ______ तु योगशिक्षायाः कालांशः ।

(घ) तत् श्रुत्वा राजा ______ आसीत् ।

**मञ्जूषा**

| अपि, इदानीम्, तूष्णीम्, मा |
|---|

7. कोष्ठके प्रदत्तशब्देषु समुचितां विभक्तिं प्रयुज्य वाक्येषु रिक्तस्थानानि पूरयत । (केवलं प्रश्न**त्रयम्**) **3 × 1 = 3**

(क) धिक् ______ । (जाल्म)

(ख) अधुना तु ______ कृते योगशिक्षा अतीव उपयोगिनी अस्ति । (अस्मद्)

(ग) सः शिववीरचरः ______ न विरमति । (निजकार्य)

(घ) रत्नानां मध्ये यत् ______ रोचते तत् गृहाण । (युष्मद्)

8. अधोलिखितवाक्येषु रेखाङ्कितपदानां समुचितं विग्रहं समासं वा चित्वा लिखत । (केवलं प्रश्न**त्रयम्**) **3 × 1 = 3**

**(क)** किं प्रतिदिनम् ईदृशी कक्षा प्रचलिष्यति ?

(i) दिनं प्रति (ii) प्रति प्रति दिनम्

(iii) प्रत्येकं दिनं (iv) दिनं दिनं प्रति

**(ख)** तस्य कर्मसु नैपुण्यम् दृष्ट्वा एव ओडिशासर्वकारस्तं सचिवपदे नियुक्तवान् ।

(i) कर्मनैपुण्यम् (ii) नैपुण्यकर्म

(iii) कर्मणानैपुण्यम् (iv) कर्म एव नैपुण्यम्

collegebatch.com

(ग) जात ! पश्यामि ते मुखपुण्डरीकम् ।

(i) मुखम् पुण्डरीकः (ii) मुखम् एव पुण्डरीकम्

(iii) मुखः एव पुण्डरीकः (iv) मुखस्य पुण्डरीकम्

(घ) अपगतः मलः यस्मात् तस्मिन् हि मनसि विशन्ति सुखेनोपदेशगुणाः ।

(i) अपगतमलः यस्मात् (ii) मलगते

(iii) अपगतमले (iv) अपगते मले तस्मिन्

## खण्डः – 'घ' 25 अङ्काः

### (i) पठितावबोधनम्

9. अधोलिखितं गद्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत – 5

ततो ब्राह्मणस्तानि रत्नानि गृहीत्वा उज्जयिनीं यावदागतस्तावद्यज्ञसमाप्तिर्जाता । राजावभृथस्नानं कृत्वा सर्वानर्थिजनान् परिपूर्णमनोरथानकरोत् । ब्राह्मणो राजानं दृष्ट्वा रत्नान्यर्पयित्वा प्रत्येकं गुणकथनमकथयत् । ततो राजावदत्, "भो ब्राह्मण ! भवान् यज्ञदक्षिणाकालं व्यतिक्रम्य समागतः । मया सर्वोऽपि ब्राह्मणसमूहो दक्षिणया तोषितः । तर्हि त्वमेतेषां रत्नानां मध्ये यत्तुभ्यं रोचते तद्गृहाणेति । ब्राह्मणेनोक्तम्, 'गृहं गत्वा गृहिणीं, पुत्रं, स्नुषां च पृष्ट्वा सर्वेभ्यो यद्रोचते तद्ग्रहीष्यामीति ।'

(अ) एकपदेन उत्तरत – (केवलं प्रश्न**द्वयम्**) $2 \times ½ = 1$

(क) राज्ञा सर्वोऽपि ब्राह्मणसमूहो कया तोषितः ?

(ख) राजा कान् परिपूर्णमनोरथानकरोत् ?

(ग) ब्राह्मणः कं दृष्ट्वा रत्नानि अर्पयित्वा गुणकथनमकथयत् ?

(आ) पूर्णवाक्येन उत्तरत – (केवलं प्रश्न**द्वयम्**) $2 \times 1 = 2$

(क) यदा ब्राह्मणः रत्नानि गृहीत्वा उज्जयिनीम् आगतः तदा किम् अभवत् ?

(ख) राजा ब्राह्मणाय किं ग्रहीतुम् अकथयत् ?

(ग) ब्राह्मणेन राजानम् प्रति किम् उक्तम् ?

collegebatch.com

(इ) निर्देशानुसारम् उत्तरत – (केवलं प्रश्न**द्वयम्**) **2 × 1 = 2**

(क) 'गृहाण' इति क्रियापदस्य कर्तृपदं गद्यांशे किं प्रयुक्तम् ?

(ख) 'रत्नानि' इति पदस्य विशेषणपदं गद्यांशे किं प्रयुक्तम् ?

(ग) 'आदाय' इति पदस्य पर्यायपदं गद्यांशात् चित्वा लिखत ।

10. अधोलिखितं पद्यं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत – **5**

उत्साहसम्पन्नमदीर्घसूत्रं क्रियाविधिज्ञं व्यसनेष्वसक्तम् ।
शूरं कृतज्ञं दृढनिश्चयं च लक्ष्मीः स्वयं वाञ्छति वासहेतोः ।।

(अ) एकपदेन उत्तरत – (केवलं प्रश्न**द्वयम्**) **2 × ½ = 1**

(क) श्लोके केषु असक्तम् उक्तम् ?

(ख) का स्वयं वासहेतोः वाञ्छति ?

(ग) कस्याः विधिज्ञं लक्ष्मीः वासहेतोः वाञ्छति ?

(आ) पूर्णवाक्येन उत्तरत – (केवलं प्रश्न**द्वयम्**) **2 × 1 = 2**

(क) केन सम्पन्नं मनुष्यं लक्ष्मीः स्वयं वासार्थम् इच्छति ?

(ख) लक्ष्मीः उत्साहसम्पन्नमदीर्घसूत्रं मनुष्यं किमर्थं वाञ्छति ?

(ग) लक्ष्मीः कीदृशं नरं वासहेतोः वाञ्छति ?

(इ) निर्देशानुसारम् उत्तरत – (केवलं प्रश्न**द्वयम्**) **2 × 1 = 2**

(क) 'वाञ्छति' इति क्रियापदस्य कर्तृपदं श्लोके किं प्रयुक्तम् ?

(ख) 'दृढ़ शब्दस्य' विशेष्यपदं किं प्रयुक्तम् ?

(ग) 'कृतघ्नम्' इति पदस्य विलोमपदं श्लोकात् चित्वा लिखत ।

collegebatch.com

11. अधोलिखितं नाट्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत – **5**

जनकः सा वाणी विनयः स एव सहजः पुण्यानुभावोऽप्यसौ ।
हा हा देवि किमुत्पथैर्मम मनः पारिप्लवं धावति ।।

कौसल्या जात ! अस्ति ते माता ? स्मरसि वा तातम् ?

लवः नहि ।

कौसल्या ततः कस्य त्वम् ?

लवः भगवतः सुगृहीतनामधेयस्य वाल्मीकेः ।

कौसल्या अयि जात ! कथयितव्यं कथय ।

लवः एतावदेव जानामि ।

(प्रविश्य सम्भ्रान्ताः)

बटवः कुमार ! कुमार ! अश्वोऽश्व इति कोऽपि भूतविशेषो जनपदेष्वनुश्रूयते, सोऽयम् अधुनाऽस्माभिः स्वयं प्रत्यक्षीकृतः ।

(अ) एकपदेन उत्तरत – (केवलं प्रश्न**द्वयम्**) **2 × ½ = 1**

(क) सम्भ्रान्ताः के जाताः ?

(ख) जनपदेषु बटुभिः कः प्रत्यक्षीकृतः ?

(ग) 'स्मरसि वा तातम् ?' इति का पृच्छति ?

(आ) पूर्णवाक्येन उत्तरत – (केवलं प्रश्न**द्वयम्**) **2 × 1 = 2**

(क) लवं दृष्ट्वा जनकस्य मनः कीदृशं भवति ?

(ख) लवः किं न जानाति ?

(ग) बटवः अश्वं दृष्ट्वा लवं किं कथयन्ति ?

collegebatch.com

(इ) निर्देशानुसारम् उत्तरत – (केवलं प्रश्न**द्वयम्**) **2 × 1 = 2**

(क) 'जानामि' इति क्रियापदस्य कर्तृपदं नाट्यांशे किम् ?

(ख) 'वाल्मीकेः' अत्र विशेषणपदं किं प्रयुक्तम् ?

(ग) 'इदानीम्' इति अर्थे किं पदम् अत्र प्रयुक्तम् ?

12. अधोलिखितवाक्येषु रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत – (केवलं प्रश्न**चतुष्टयम्**) **4 × 1 = 4**

(क) असुर्या नाम ते लोकाः अन्धेन तमसाऽऽवृताः ।

(ख) तम् अध्वरे विश्वजिति क्षितीशं निःशेषविश्राणितकोषजातम् ।

(ग) कर्मणा एव हि संसिद्धिमास्थिताः जनकादयः ।

(घ) स्वागतम् अत्र भवतां कक्षायाम् ।

(ङ) श्रीनायरस्य दायित्वग्रहणस्य स्थगितानां समस्यानां समाधानं जातम् ।

13. अधोलिखितस्य श्लोकस्य अन्वयं लिखत – **3**

विद्यां चाविद्यां च यस्तद्वेदोभयं स ह ।

अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते ।।

14. (a) अधोलिखितस्य श्लोकस्य भावार्थं संस्कृतभाषया लिखत । **3**

सुखदुःखसमे कृत्वा लाभालाभौ जयाजयौ ।

ततो युद्धाय युज्यस्व नैव पापमवाप्स्यसि ।।

**अथवा**

(b) 'कार्यं वा साधयेयम्, देहं वा पातयेयम्' इति पाठम् आधृत्य शिववीरविश्वासपात्रस्य चरित्रचित्रणं सङ्क्षेपेण संस्कृतभाषया लिखत ।

collegebatch.com

## खण्डः – 'घ' 10 अङ्काः

### (ii) संस्कृत–साहित्येतिहासस्य सामान्यः परिचयः

15. अधोलिखितप्रश्नानाम् उत्तराणि विकल्पेभ्यः चित्वा लिखत। (केवलं प्रश्न**त्रयम्**) $3 \times 1 = 3$

(क) रघुवंशस्य कस्मिन् सर्गे अग्निवर्णस्य विलासमयं जीवनं वर्णितम् ?

(i) त्रयोदशे सर्गे (ii) नवदशे सर्गे

(iii) षष्ठे सर्गे (iv) एकादशे सर्गे

(ख) 'सौन्दरनन्दम्' इति महाकाव्यस्य रचयिता कः अस्ति ?

(i) श्रीहर्षः (ii) माघः

(iii) भारविः (iv) अश्वघोषः

(ग) 'विक्रमांकदेवचरितम्' इति महाकाव्ये कस्य राज्ञः वर्णनम् अस्ति ?

(i) विक्रमादित्यस्य (ii) सिन्धुराजस्य

(iii) कुमारपालस्य (iv) हर्षवर्धनस्य

(घ) 'कल्हण:' किम् ऐतिहासिकं महाकाव्यम् अरचयत् ?

(i) मधुराविजयम् (ii) कीर्तिकौमुदी

(iii) राजतरंगिणी (iv) सुकृत–संकीर्तनम्

16. प्रश्नानाम् उत्तराणि विकल्पेभ्यः चित्वा लिखत। (केवलं प्रश्न**त्रयम्**) $3 \times 1 = 3$

(क) एतेषु कस्य 'पदलालित्यम्' प्रसिद्धम् ?

(i) दण्डिनः (ii) सुबन्धोः

(iii) भासकवेः (iv) कालिदासस्य

collegebatch.com

(ख) गद्यकाव्यस्य प्रसिद्धा रचना का अस्ति ?

(i) मेघदूतम्

(ii) नैषधीयचरितम्

(iii) कादम्बरी

(iv) मालविकाग्निमित्रम्

(ग) 'मदालसाचम्पूः' इत्यस्मिन् ग्रन्थे कस्य कथा अस्ति ?

(i) नलस्य (ii) भोजस्य

(iii) यशोधरस्य (iv) कुवलयाश्वस्य

(घ) कीदृशं काव्यं चम्पूकाव्यम् उच्यते ?

(i) पद्यमयम् (ii) गद्यमयम्

(iii) संगीतात्मकम् (iv) गद्यपद्यमयम्

17. प्रदत्तविकल्पेभ्यः समुचितम् उत्तर चित्वा लिखत । (केवलं प्रश्न**चतुष्टयम्**) **4 × 1 = 4**

(क) मालविकाग्निमित्रस्य नायकः कः अस्ति ?

(i) मित्रः (ii) अग्निवेशः

(iii) अग्निमित्रः (iv) अग्निः

(ख) शूद्रकः कं ग्रन्थम् अरचयत् ?

(i) मृच्छकटिकम् (ii) शारिपुत्रप्रकरणम्

(iii) विक्रमोर्वशीयम् (iv) प्रतिमानाटकम्

collegebatch.com

(ग) 'प्रियदर्शिका' इति रूपकस्य रचयिता कः अस्ति ?

(i) शूद्रकः (ii) अश्वघोषः

(iii) हर्षः (iv) भवभूतिः

(घ) 'उत्तररामचरितम्' इति नाटकस्य प्रमुखः रसः कः ?

(i) वीररसः (ii) शृंगाररसः

(iii) करुणरसः (iv) हास्यरसः

(ङ) 'मुद्राराक्षसम्' इति नाटकस्य रचयिता कः अस्ति ?

(i) विशाखदत्तः (ii) भवभूतिः

(iii) हर्षः (iv) शूद्रकः

## खण्डः – 'ङ' 10 अङ्काः

### छन्दोऽलङ्कारपरिचयः

18. (अ) अधोलिखितप्रश्नानाम् उत्तराणि लिखत । (केवलं **प्रश्नत्रयम्**) **3 × 1 = 3**

(क) प्रतिचरणं 'वसन्ततिलका' छन्दसि कति वर्णाः भवन्ति ?

(ख) 'ननमयययुतेयं ________ भोगिलोकैः ।' इति कस्य छन्दसः लक्षणम् अस्ति ?

(ग) मन्दाक्रान्ता छन्दसः एकम् उदाहरणं लिखत ।

(घ) 'यगण' इत्यस्य सङ्क्षिप्त – चिह्नानि कानि सन्ति ?

(आ) अधोलिखितासु श्लोकपङ्क्तिषु प्रयुक्तं छन्दं परिचीय तस्य नाम लिखत । (केवलं **प्रश्नद्वयम्**) **2 × 1 = 2**

(क) तमध्वरे विश्वजितिक्षितीशं _______ वरतन्तुशिष्यः ।

(ख) बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते ।

(ग) भवन्ति नम्रास्तरवः फलोद्गमैर्नवाम्बुभिर्दूरविलम्बिनो घनाः ।

collegebatch.com

19. (अ) अधोलिखितप्रश्नानाम् उत्तराणि लिखत। (केवलं **प्रश्नत्रयम्**) **3 × 1 = 3**

(क) अनुप्रास – अलङ्कारस्य लक्षणं लिखत।

(ख) यमकालङ्कारस्य एकम् उदाहरणं लिखत।

(ग) 'भवेत् _______ प्रकृतस्य परात्मना।' इति कस्यालङ्कारस्य लक्षणमस्ति ?

(घ) रूपकस्य किं लक्षणम् अस्ति ?

(आ) अधोलिखितासु श्लोकपङ्क्तिषु प्रयुक्तालङ्कारस्य नाम लिखत। (केवलं **प्रश्नद्वयम्**) **2 × 1 = 2**

(क) ललित-लवङ्ग-लता-परिशीलन-कोमल-मलय-शरीरे।

(ख) कमलमिव मुखं मनोज्ञमेतत्।

(ग) अनलङ्कृतशरीरोऽपि चन्द्रमुख आनन्दयति मम हृदयम् ?

collegebatch.com